# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-1)(New)** | **प्रश्नपत्रम् – 7** | गुणाः –70 |
| विषयः – क्रियात्मक सं. शिक्षण | **कोड –C.E.1.1.1** | समयः- 11:30 तः 2:30पर्यन्तम् |
| दिनाङ्कः –16/10/2019 | सन्दर्भग्रन्थः – संस्कृतस्वाध्यायः | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ कोष्ठान्तर्गतानां प्रातिपदिकानां समुचितैः रूपैः रिक्तस्थानं पूरयत। (प्रश्नद्वयस्यैव)** १०

**अ उदा – ग्रन्थालये .................. पुस्तकानि सन्ति। (एतत्)**
**उत्तरम् - ग्रन्थालये ‘एतानि’ पुस्तकानि सन्ति।**

१ .................. विमानानि सन्ति । (तत्)
२ ..................व्यजने स्तः। (एतत्)
३ ..................भ्राता कस्यां कक्षायां पठति । (भवत्)
४ .................. साधनेन गमिष्यामि। (किम्)
५ विद्यालयात् .................. आगच्छति। (किम्)

**आ योग्य उत्तरं विलिख्य रिक्तस्थानं पूरयत।**
**उदा – एतत् पुस्तकं कस्य <u>अस्ति</u>? (अस्)**

१ द्वौ बालकौ ............. ? (अस्)
२ त्वं कुत्र ............. ? (अस्)
३ अहं छात्रः ............. ? (अस्)
४ युवां बालिके ............. ? (अस्)
५ वयं विद्यार्थीनः ............. ? (अस्)

**इ प्रदत्तक्रियापदानां स्ववाक्येन प्रयोगं कुरुत।**
**यथा – (कुरुथ) – यूयं भोजनं कुरुथ।**

१ कूर्मः २ करोमि ३ करोसि
४ कुर्वन्ति ५ कुरुथ

**प्रश्न २ कस्यचिदेकस्य प्रश्नस्योत्तरं लिखत।** **१०**

१ अस्मद् शब्दरूपाणि विलिख्य यथेष्टदशरूपैः वाक्यानि रचयत।
उदा – मया पाठः पठ्यते।

२ युष्मद् अथवा भवत् शब्दरूपाणि विलिख्य यथेष्टदशरूपैः वाक्यानि रचयत।
उदा – भवते किं रोचते?

**प्रश्न ३ कयो: अपि द्वयो: उत्तरे लेख्ये ।** **१०**

**अ प्रदत्तकोष्ठकशब्दानुरूपं द्वितीयन्तपदं संयोज्य रिक्तस्थानं पूरयत।**

उदा. – कृष्णः <u>गोपालं</u> आह्वयति । (गोपाल)

१ रमा ................ पश्यति । (चन्द्र)
२ गोप्यः ................ स्मरन्ति (कृष्ण)
३ शिशुः ................आह्वयति । (माता)
४ पिता ................ पृच्छति । (भ्राता)
५ साधकः ................ भजति । (हरि)

**आ प्रदत्तानामव्ययानां स्ववाक्येषु प्रयोगं कुरुत ।**

उदा. – अद्य अवकाशः।

१ च २. श्वः ३. इति ४. अथवा ५. अत:

**अथवा**

**इ निम्नाङ्कितधातूनां लट्लकारे रूपं लिखत ।**

१ ज्ञा २ कृ ३ दा ४ शृ ५ गृह्

**प्रश्न ४ अ प्रदत्तक्रियापदानाम् उपयोगं कृत्वा वाक्यानि रचयत।** **१०**

१ कुरुतम् २ शृणुताम् ३ गृह्णन्तु ४ ददतु ५ जानातु

आ कस्यचित् एकस्य आकारान्तशब्दस्य सर्वाणि विभक्त्यन्तरूपाणि विलिख्य यथेष्टं पञ्चवाक्यानि लिखत।

यथा - बाला अटति।

**प्रश्न ५ कावपि द्वौ प्रश्नौ समाधेयौ।** **१०**

**अ प्रदत्तानां वाक्यानां लङ्लकारे रूपं परिवर्तयत।**

उदा – रमेशः विद्यालयं गच्छति।

उत्तरम् – रमेशः विद्यालयम् अगच्छत् ।

१ पशवः खादन्ति।

२ छात्राः पाठं पठन्ति।

३ अर्चकाः मन्दिरं गच्छन्ति।

४ शिवः कल्याणं करोति।

५ नारायणः कृपां करोति।

**आ रेखाङ्कितपदस्य स्थाने क्तवतु प्रयोगे रूपं परिवर्तयत ।**

उदा. – बालकः विद्यालयं <u>अगच्छत्</u> ।

उत्तरम् – बालकः विद्यालयं <u>गतवान्</u> ।

१ रामः भोजनम् <u>अकरोत्</u> ।

२ सः <u>अहसत्</u> ।

३ उषा <u>अधावत्</u> ।

४ ताः महिलाः <u>अगच्छन्</u> ।

५ तौ छात्रौ <u>अपठताम्</u>।

**इ अधोनिर्दिष्ट क्तवतु प्रत्ययन्तशब्दानां प्रयोगं कृत्वा वाक्यं रचयत ।**

१ पठितवन्तौ २ गतवती ३ पाठितव्यः

४ गतवन्तः ५ प्रक्षालितवत्यौ

**प्रश्न ६ रेखाङ्कितक्रियापदानां लृट्लकारे प्रयोगं कृत्वा वाक्यं परिवर्तयत । (दशानामेव)** **१०**

१ अर्चकः मन्त्रं <u>वदति</u> ।

२ भगिनी धनं <u>नयति</u> ।

३ एषा गातुं <u>शक्नोति</u> ।

४ तरुणः सङ्गीतं <u>शृणोति</u>।

५ गृहिण्यौ जलेन <u>सिञ्चतः</u>।

६ वृक्षात् फलानि <u>पतन्ति</u>।

७ स्वर्णकारः आभूषणं <u>निर्माति</u> ।

८ बालकः गुरुं <u>नमति</u>।

९ सीता वनं <u>गच्छति</u> ।

१० मार्जारः दुग्धं <u>पिबति</u> ।

११ भक्तः रामं <u>भजति</u>।

१२ छात्राः विद्यालयं <u>गच्छन्ति</u> ।

**प्रश्न ७ एकैक वाक्येन दशानामेवोत्तराणि लिखत । १०**

१ युष्मद्-शब्दस्य द्वितीयाबहुवचनान्तं रूपं भवति।

२ ह्यः इत्यव्ययस्य कालः कः?

३ भवत्-शब्दस्य तृतीयाबहुवचनान्तं रूपं भवति।

४ अद्याऽहं गमिष्यामि । (वाक्येऽस्मिन् अव्ययपदं दर्शयत)

५ कुर्वः इत्यस्य प्रयोगं कृत्वा वाक्यं रचयत।

६ दा धातोः लोटि प्र. पु. ब. व. किं रूपं भवति?

७ हरि शब्दस्य सप्तमीविभक्तिस्थानि रूपाणि लिखत।

८ छात्राः छात्रावासं गच्छन्ति। (लङ्लकारे परिवर्तयत)

९ ‘किम्’ शब्दस्य पञ्चम्यैकवचने किं रूपं भवति?

१० अस्मद् शब्दस्य षष्ठीबहुवचनान्तं किं रूपं भवति ?

११ महिला वनमगच्छत् । (क्तवतु प्रयोगे रचयत)

१२ शृ धातोः लटि मध्यमपुरुषबहुवचनान्तं किं रूपं भवति?